यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।

तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ ७.२१ ॥

yo yo yāṁ yāṁ tanuṁ bhaktaḥ śraddhayārcitumicchati |
tasya tasyācalāṁ śraddhāṁ tāmeva vidadhāmyaham || 7.21||

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।

लभते च ततः कामान्मयैवः विहितान्हितान् ॥ ७.२२ ॥

sa tayā śraddhayā yuktastasyārādhanamīhate |
labhate ca tataḥ kāmānmayaivaḥ vihitānhitān || 7.22||

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।

देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ ७.२३ ॥

antavattu phalaṁ teṣāṁ tadbhavatyalpamedhasām |
devāndevayajo yānti madbhaktā yānti māmapi || 7.23||